भावसत्वनियमादितिसूचितं। नवोत्पत्तिकालावच्छेदेन घटादेर्गुणस्य प्रागभावएवनतुसामान्यात्यंताभावोविमानाभावादितिवाच्यं। तदानीमजन्यैकत्वेतुभूतस्य एकत्वावच्छिन्नाभावस्यावश्यकतयातस्यैवत्वसमनियतगुणत्वावच्छिन्नाभाव। प्रयुक्ततयाविशेषयोगात्। संयोगादिसाध्यकनित्यद्रव्यमात्रवृत्तिहेतुकस्थलेव्याप्तिदानायाह। प्रलयेति। महाप्रलयस्यजन्यभावानधिकरणतयातदानींसंयोगाद्यसत्वादितिभावः। तदानींचगमनादौनित्यैकत्वपरिमाणादिसत्वेनगुणसामान्याभावासत्वात्संयोगस्येत्युक्तं। अत्रचप्रमाणंमहाप्रलयेगगनेनसंयोगइत्यादिप्रामाणिकव्यवहारएव। तादृशव्यवहारस्यासावगहितेतिप्रसंगाद्व्यवहारानादरेचातीं द्रियगगनादौगौरवाद्यभावस्याप्रामाणिकत्वापत्तेः प्रत्यक्षासंभवात्। अनुमानस्यात्रयोजकत्वात्। वह्निमान्धूमादित्यत्रव्याप्तिदानायाह तिथेति। दहनस्यहिनत्वावच्छिन्नस्य। प्रतीतिरित्यंतद्द्रव्यस्याव्याप्यवृत्तित्वादित्यवधेयं। प्रत्यक्षप्रमाणमुक्त्वायुक्तिमप्याह। इतेरिति। संयोगरूपसंबंधस्येत्यर्थः। वृत्तिमतोव्याप्यवृत्तिस्थसंयुक्तस्यतत्संबंधेनव्याप्यवृत्तितायाः। असंभावितत्वादितिअयमाशयः। संबंधिसत्तायाः संबंधाधिनत्वादवच्छेदेनसंबंधोनास्तितदवच्छेदेनतत्संबंधावच्छिन्नतदभावसत्वमावश्यकं। संयोगादेः संबंधस्यसमवीयस्यव्याप्यवृत्तित्वेपिनसंयोगाद्यव्याप्यवृत्तितागुणादेस्समवायसत्वेपिसंयोगाद्यसत्वसंयोगाद्यनवच्छेदकावच्छिन्नेसंयोगादिमतितत्समवायसत्वेपितदभावोपपतेरिति। केचित्तुवृत्तेरव्याप्यवृत्तित्वेवृत्तिमतोव्याप्यवृत्तित्वंदुर्वचंव्याप्यवृत्तित्वंतुयुक्तितोल्यात। संयोगादिप्रतियोगिकत्वविशिष्टसमवायपिनव्याप्यवृत्तिरित्याहुः। वह्निमान्धूमादित्यादौकालविशेषावच्छेदेनहेतुमतिवर्तमानेसाध्याभावमादायघटत्वंकालत्वादित्यादौपदार्थावच्छेदेनकालेवर्तमानंकालिकसंबंधावच्छिन्नाभावमादायचव्याप्तिदानायाहएवमितिं। प्रतियोगिमतोदेशस्यप्रतियोग्यनधिकरणकालावच्छेदेनप्रतियोगिमतः कालस्यचप्रतियोग्यनधिकरणदेशावच्छेदेनाभाववत्वमित्यर्थः। इदानीमत्रघटोनास्तीत्यादिप्रत्ययेदेशनिष्ठायाः कालावच्छिन्नाधारतायाः कालनिष्ठायादेशविशेषावच्छिन्नाधिकरणतायावाविषयत्वमित्यत्रविनिगमनाविरहादुभयस्यैवविषयत्वादितिभावः। तत्तत्साध्यकेति। गुणत्वाद्यवच्छिन्नसाध्यकद्रव्यत्वाद्यव्याप्तिवारणायेत्यर्थः। ततः। असमानाधिकरणात्। अव्याप्यवृत्तिसाध्यकेप्रतियोगिव्यधिकरण्याघटितव्याप्तेरप्रसिद्धेरितिभावः। व्याप्यवृत्तेरपिसाध्यस्याव्याप्यवृत्तित्वग्रहदशायांप्रतियोगिव्यधिकरण्यघटितव्याप्तिज्ञानादेवानुमित्युपपत्तेः व्याप्यवृत्तिसाध्यकेसर्वत्रतादृशविशेषणोपादानानियमः। तद्घटितायाअपिव्याप्तेः सर्वत्रानुमित्यौपयिकत्वात्। अव्याप्यवृत्तिसाध्यकेतुसर्वत्रतदुपादाननियमएवतद्घटितव्याप्तेरप्रसिद्धेरितिभावार्थः। व्याप्यवृत्तिसाध्यकत्वंचसमानाधिकरणाभावाप्रतियोगिसाध्यकत्वं। सत्तावानद्रव्यत्वात्कालिकसंबंधावच्छिन्नाकाशाभाववान्आत्मत्वादित्यादिकंचनतथाअतस्तत्रसाध्यवतिकालात्यादौकालिकदेशिकविशेषणताभ्यांतदभावसत्वात्प्रतियोगिव्यधिकरण्याविशेषितहेतुसमानाधिकरणाभावाप्रतियोगित्वस्यसाध्यसत्वेनव्याप्तेः प्रतियोगिव्यधिकरण्यघटितत्वनियमेपिनदोषः केचित्तुव्याप्यवृत्तिसाध्यकत्वंयथाश्रुतमेवहेतुमत्यभावस्यदैशिकविशेषणतयावृत्तिर्विवक्षणीयाअतोहेतुमतिकालादौकालिकविशेषणतादिनासाध्याभावसत्वेपिनाव्याप्तिः। भावस्याप्यभावत्वेनदैशिकविशेषणतयावृत्तिः प्रमाणिकीअतोनाभावसाध्यकत्वंचादिपदनिष्ठव्याप्तिः। यादृशप्रतियोगितानिरूपकाभावत्वविशिष्टस्यदैशिकविशेषणतयाहेतुमतिवृत्तित्वंतादृशप्रतियोगितानवच्छेदकत्वविवक्षयाकालिकसंबंधावच्छिन्नप्रतियोगिकाकाशाभाववानद्रव्यत्वादावव्याप्तिर्निरासः। तत्राकाशाभावस्याकाशाभावत्वेनैवदैशिकविशेषणतयाआत्मनिवृत्तिर्नतुऽकसाध्यतावच्छेदकावच्छिन्नप्रतियोगिताकत्वेनआत्मनिताद्दशाभावाभावोनास्तीत्यप्रतीतेः। अव्याप्यवृत्तिसाध्यकेपिसंयोगाभाववान्नित्यत्वगुणत्वादित्यादावनुमित्योपयिकत्वविधाव्याप्तेः। संभवेनसर्वथैवेत्यंतावताव्याप्यव्याप्यवृत्तिसाध्यकेक्वचित्तद्घटितव्याप्तिः संभवइतिसूचितमित्याहुः। यत्तु



व्याप्यवृत्तिसाध्येकेऽव्याप्यवृत्तित्वग्रहविषयसाध्येकेवंथेवासामानाधिकरण्यंतस्यानुपादेयत्वात्॥तत्रलाघवेन सि-
प्रतियोग्यसामानाधिकरण्याघटितव्याप्तेरेवानुमानांगत्वात्स्वीकारादितिव्याख्यानंतदसत्।तत्राविनाभावादिनाप्रतियोग्यसामानाधिकरण्यघटितव्याप्तेरेवदृष्टा
दानुमितिरूपसाध्यतादृश्याप्तिरनुमानांगतयास्वीकर्तव्यत्वात्।अन्यथादृश्याव्याप्तिरूपेसाध्येनकेवलान्वयिलक्षणेसाध्यकेलाघवेनसाध्याभावव्यधिकरणत्वमा
त्रस्यैवव्याप्तिज्ञापकप्रसंगात्केवलान्वयिनोयत्रसाध्यस्यनव्याप्तिरूपंलक्षणमविषयतातत्साध्यकेहेतुसामानाधिकरण्यविशेषणपरित्यागस्यापिप्रसंगात्।यत्तुप्र
तियोग्यसामानाधिकरण्यंत्यत्रप्रतियोगिपदंस्वप्रतियोगिपरमवश्यवाच्यं।अन्यथाप्रतियोगित्वस्यसामान्यरूपेणकेवलान्वयितयाप्रतियोग्यसमानाधिकरणाभा
वस्यैवदुर्लभत्वापत्तेः।तथाचस्वपदस्यतत्तद्भावपरतयातत्तद्भावप्रतियोग्यसामानाधिकरण्यंविशिष्टत्वेनहेतुंनछीनांतत्तद्भावव्यक्तीनांप्रतियोगितावच्छेदक
त्वाभावकूटज्ञानंप्रतिकारणंवाच्यं।तादृशंचज्ञानंसर्वस्यैवदुर्घटं।अतःप्रतियोगिपदस्यप्रकृतेसाध्यार्थकतयासाध्याभावनिष्ठसाध्यसामानाधिकरण्याभाव
विशिष्टःसनहेतुमद्वृत्तिरभावएवानुगतरूपेणनिवेश्यः।सत्येतौसर्वेषामेवहेतुसमानाधिकरणाभावानांसर्वत्रहेत्वधिकरणसाध्यसमानाधिकरण्यतयासाध्य
सामानाधिकरण्याभावविशिष्टस्यहेतुमद्वृत्तित्वेनप्रसिध्यतीतिसाध्याभावनिष्ठंसाध्यसामानाधिकरण्यंविशेषणं॥सत्येतौसर्वत्रसाध्याभावभिन्नाभा
वितत्प्रसिद्धिसंभवःव्यभिचारिणिचव्यभिचारनिरूपाधिकरणएवसाध्याभावेसाध्यसामानाधिकरण्याभावविशिष्टतयाहेतुमद्वृत्वमितिसाध्याभावस्यापि
लक्षणघटकतयात्मानाश्रयाव्याप्तिः॥सयोनेर्गमेयसामान्यसाध्यकसत्येतौसाध्याभावातिरिक्ताभावाप्रसिध्याहेतुमतिसाध्याभावनिष्ठसाध्यसामाना
धिकरण्याभावविशिष्टभावाप्रसिद्धिरितिसाध्यकावच्छेदकावच्छिन्नाभावनिष्ठसाध्यसामान्याधिकरण्यस्याभावोनिवेशनीयः।एवंचव्याप्यवृत्ति
साध्यकेसाध्यतावच्छेदकावच्छिन्नसाध्याभावनिष्ठसाध्यसामानाधिकरण्याप्रसिध्याईदृशव्याप्तिर्नप्रसिद्धेतीतितत्साध्यकेप्रतियोग्यसामा

नाधिकरण्याघटितैवव्याप्तिरंगंवाच्यमित्यादिनेतितदपिनासाध्यसामानाधिकरण्यविशेषणीभूतसाध्याभावेसाध्यतावच्छेदकसंबंधावच्छि
न्नप्रतियोगितानिरूपितत्वनिवेशप्रयोजनाभावात्।व्याप्यवृत्तिसाध्यकेपिसंबंधावच्छिन्नसाध्याभावएवसाध्यसामानाधिकरण्यप्रसिध्यातत्राप्युक्त
व्याप्तिप्रसिद्धेः।व्याप्यवृत्तिसाध्यकस्थलेद्विविधाव्याप्तिर्नव्याप्यवृत्तिसाध्यकेतिसाध्यभेदेनभेदेनभावेनसंभवतीत्यतआहसाध्यादिभेदेनेति॥सा
ध्यतावच्छेदकादिविशिष्टव्याप्तिघटकतयातदुद्देश्यत्वंतदुद्देश्यत्वंचावश्यकत्वादितिभावः।यद्यपिजात्यादौगुणकर्मत्वान्यादिसामानाधिकरण्यापलक्षितस्यसत्वादेर्व्या
प्तिरस्त्येवगुणादौतदुपलक्षितत्वाद्यनुमितेःप्रमात्वात्तथापिगुणादौगुणान्यत्वादिसामानाधिकरण्यविशिष्टसत्तादिप्रतियोगिकवैशिष्ट्यावगाहिन्यावअनु
मितेर्भ्रमत्वात्तत्रतादृशानुमित्योपयिकव्याप्तिस्वीकारेसल्लिंगपरामर्शादपिभ्रमःस्यादितितादृशानुमित्योपयिकव्याप्तिगुणादिवृत्तिहेतोरस्वीकर्तुंश
क्यतेतःसाध्यतावच्छेदकविशिष्टवैशिष्ट्यविषयकानुमित्योपयिकव्याप्तिरावश्यकीप्रतियोगितावच्छेदकविशिष्टवैशिष्ट्याधिकरण्यपर्यंतंनिवेश्यतत्रतादृशाति
व्याप्तिवारणायप्रतियोग्यसामानाधिकरण्यंचेति।नचतत्रापिव्याप्तिस्वीकारेक्षतिविरहःगुणोगुणान्यत्वविशिष्टसत्तावानित्यादौतादृशव्याप्तिस्व
रूपेपिबाधनैत्यहेतोर्दुष्टत्वापत्तेः।द्रव्यपदकत्वादृशसाध्यकजात्यादिहेतोश्चसमवीनतायाएवोपगमेक्षतिविरहात्।बाधानवतारदशायांचगु
णादौजात्यादिलिंगकविशिष्टसत्तावैशिष्ट्यानुमितिभ्रमरूपाप्रमात्मकसल्लिंगकपरामर्शादपिस्वीक्रियते।अतएवगंधप्रागभावकालावच्छिन्नोप
स्थितगंधवान्पृथिवीत्वादित्यादौबाधानवतारदशायांप्रमात्मकपरामर्शाद्विशिष्टयनुयोगिकवैशिष्ट्यावगाहिनीभ्रमानुमितिर्मणिकारेणोपगम्यत
इतिवाच्यं।भ्रमानुमितिजनकपरामर्शस्यभ्रमत्वसंभवेतदुपादानमावश्यकमित्याहि[illegible]

शयात् गंधप्रागभावावच्छिन्नो घटो गंधवान् पृथिवीत्वादित्यादौ परामर्श्यस्य कथंचिदपि भ्रमत्वासंभवेनागत्यातत्र प्रसाधकपरामर्शेऽनुमि
तिरूपो कारात् गुणो विशिष्टसत्तावान् जातिमत्त्वादित्यादिविशिष्टप्रतियोगिकवैशिष्ट्यविषयकानुमितिस्थलमुपेक्ष्य गंधप्रागभाववानूघ
टो गंधवानित्यादिविशिष्टानुयोगिकवैशिष्ट्यविषयकानुमितिस्थलमात्रेऽभिचारासंकीर्णबाधोदाहरणत्वनाभिहितयतोमणिकृतोयु
क्तस्थलेव्याप्तिर्नास्तीत्यन्यायउन्नीयतेवअथविशिष्टनिरूपितएवसमवायादिर्विरोध्यादिरोधिनाविशिष्टाभावस्यप्रतियोगितावच्छेद
कसंबधःशुंठ्यसमवायादेस्तथात्वेदंडाद्युपलक्षितपुरुषादिमत्त्वविरोधितादृशपुरुषाद्यभाववैलक्षण्यान्निर्वाहात्।—नचतदुपलक्षित
पुरुषाद्यभावस्यसधर्मेनप्रतियोगितावच्छेदकः अपितुप्रतियोगितासामानाधिकरण्येनैवप्रतियोगितावच्छेदकस्यैवप्रतियोगिनिवि
शेषणत्वादतादृशस्यैवचोपलक्षणत्वादितितादृशाभावयोर्विशेषइतिवाच्यं।उपलक्षणेनदंडादिना व्यावृत्तप्रतियोगिनिष्ठप्रतियो
गितायांपुरुषत्वादेरतिप्रसक्तयातन्मात्रेतदवच्छेदकतायाःपर्याप्तसंभवेनदंडादेरपितदवच्छेदककोटाववश्यमंतर्भावात्।अंतश्चायपु
रुषादिमात्रेणनदंडाद्युपलक्षितपुरुषाद्यभावस्यविशेषःतदवच्छिन्नाभावमात्रस्यैवतद्विशिष्टाभावत्वेसत्तान्नियतपृथिवीसमवेत
शून्यंवायुत्वादित्यादौयथाकूटघटितलक्षणार्थितेव्याप्तिज्ञानमपिविरुध्येतपृथ्वीसमवेततत्त्वविशिष्टाभावस्यवाय्वादौसत्त्वेनवा
युत्वादेस्तत्रसाध्येसत्त्वेनुत्वात्तथात्वेप्रतियोगितावच्छेदकावच्छिन्नासामानाधिकरण्याविवक्षायामपिनातिव्याप्तिःप्रतियोगितावछे शिव
दकत्वावच्छिन्नसंबंधेनगुणादेर्विशिष्टसत्तानधिकरणत्वादितिचेन्नाविशिष्टनिरूपितसंबंधस्यविशिष्टाभावप्रतियोगितावच्छेद ७७

कत्वंसर्वत्रनसंभवतीतिप्रागुक्तत्वात्अगत्याविशिष्टाभावप्रतियोगितायाविशेषणांतर्भावेनपर्याप्तोउपलक्षिताभावप्रतियोगितादंडादिसा
वच्छेदकोपलक्षितविशिष्टएवपर्याप्तेत्युपगम्यतेयोर्विशेषस्योपपादनत्वात्।विशिष्टस्यातिरिक्ततामतेविशिष्टसत्ताभावःसहजतएवप्र
तियोसमानाधिकरणइत्यभयसाध्यकानुसरणंनातिप्रसंगइतिहेतुमतिविशिष्टाभावादेःशुंठ्यप्रतियोगिसामानाधिकरण्ये
पिविशिष्टप्रतियोगिसामानाधिकरण्यविरहेणनभ्रमानुमितिजनकपरामर्शस्यप्रमात्वप्रसंगइत्यर्थः।व्याप्यवृत्तिसाध्येकेपि
प्रतियोगिवैय्यधिकरण्यावगाहिपरामर्शस्यानुमितिहेतुतयाउक्तसाध्यस्यव्याप्यवृत्तित्वेपिनातिप्रसंगाप्रसक्तिः।ननुमूर्तत्वादिहेतोरमूर्त
त्वादिविशिष्टमूर्तत्वत्वादिरूपतदुभयत्वावच्छिन्नस्यैवनव्याप्तिर्नतुतदुभयवृत्तिबुद्धिविशेषविषयत्वरूपतदुभयत्वावच्छिन्नस्यनथाच
विशिष्टातिरिक्ततामतेविशिष्टसत्तादिसाध्यकनात्मादिहेतावपिउक्तोभयसाध्यकमूर्तत्वादिहेतावपियथाश्रुतप्रतियोग्यसामानाधि
करण्यनिवेशमक्षेनातिव्याप्तिप्रसक्तिरित्यभिमाननचेत्यादिनानिराकरोति।नचेति।सहजतएव।प्रतियोगि व्याधिकरणयदस्यत्वावछेद
कविशिष्टपरतांविनैवोभयत्वंउभयव्यवहारविषयतावच्छेदकंना।विशिष्टत्वात्।एकविशिष्टापरत्वात्।अनतिरिक्तं।आभिन्नं।अतिरिक्त
मित्यनुक्तानातिरिक्तमित्यभिधानंउभयपदार्थतावच्छेदकत्वावच्छेदेनातिरिक्तत्वलाभायनत्वपदस्यानुयोगितावच्छेदकावच्छेदेनाभावबो
धकत्वव्युत्पत्तेः।तावताएकविशिष्टापरत्वमुभयनिष्ठत्वासज्यवृत्तिधर्मश्चउभयपदार्थतावच्छेदकमस्तुमरुतश्चउभयत्वमेकविशिष्टापरत्वमेवेति
शंकाव्यर्थतासः।अत्रहेतुर्वैशिष्ट्यविरहेविघटत्वपटत्वयोरुभयत्वस्यप्रत्यक्षसिद्धत्वादिति।घटत्वपटत्वयोःसामानाधिकरण्यविरहेपिनत्वेनोभयव्यवहारविषयतावि

छेदकस्य प्रसक्षसिध्यत्वादित्यर्थः। अन्यथा तत्रोभयव्यवहारानुपपत्तेरितिभावः। यद्यपि घटत्वपटत्वोभयमितिप्रतीतौ कालिकसंबंधघटितसामानाधिकरण्यरूपवैशिष्ट्यस्यापि विषयतायामविशेषात्तथापि वाचत्वघटत्वोभयंसमवेतमित्यादिप्रतीतिव्यवहारविरहेण उभयंसमवेतमितिप्रतीतिव्यवहारयोः समवायिसमवेतत्वरूपवैशिष्ट्यविषयतायामभ्युपगंतव्यतयाघटत्वपटत्वोभयंसमवेतमित्याद्योतादृशी वैशिष्ट्याप्रसिध्या व्यासज्यवृत्तिधर्मएवविषयतिभावः तथा चतदनुरोधेनव्यासज्यवृत्तिधर्मविशेषस्यउभयव्यवहारविषयतायाआवश्यकत्वेएकविशिष्टापरत्वस्यतद्व्यवहारविषयत्वसमानाधिकमितिनभूतत्वमूर्तत्वोभयवान्मूर्तत्वादिसाधकेएकविशिष्टापरत्वस्यसाध्यतावच्छेदकत्वप्रसक्तिस्तथासत्यनुमितेरुभयवानद्रव्यत्वाकारकतानुपपत्तेरितिनिर्व्यूढंनमूर्तत्वाधिकरणेमनसिभूतत्वमूर्तत्वोभयनास्तीतिबुध्येरेकविशिष्टापराभावावलंबनेनैवोपपत्तिःमनसिप्रतियोगिसत्वेनोभयवृत्तिधर्मावच्छिन्नाभावासत्वादितिकश्चिदेकविशिष्टापरत्वस्यापिउभयव्यवहारविषयतावच्छेदकत्वमावश्यकमित्यतआहनवेति। तदवच्छिन्नाभावः। प्रत्येकाधिकरणवृत्तिरुभयव्यवहारविषयतावच्छेदकावच्छिन्नाभावः। तदवच्छिन्नाभावात्। एकविशिष्टापरत्वावच्छिन्नाभावात्। नअनतिरिक्तइतिविपरिणतेनसंबंधः। प्रतियोगितावच्छेदकविशिष्टेनैवप्रतियोगिनाअभावस्यविरोधादेकस्याधिकरणेपिव्यासज्यवृत्तिधर्मावच्छिन्नाभावसत्वेबाधकाभावादितिभावः। एतेनमूर्तत्वस्यव्यासज्यवृत्त्यभयत्वावच्छिन्नत्वंव्यभिचारितापिव्यवस्थापिता। आवश्यकश्चएकाधिकरणेव्यासज्यवृत्तिधर्मावच्छिन्नतदभावः। अन्यथासंसर्गाघटितसामानाधिकरण्येनघटत्वादिविशिष्टपटत्वाद्यप्रसिध्याघटादौसमवायेनघटत्वपटत्वोभयंनास्तीतिप्रतीतेरनुपपत्तेस्तत्रसमवायिसमवेततत्तद्रूपवैशिष्ट्यावच्छिन्नाभावस्यविषयतायाःस्वीकरणीयत्वात्। अन्यथाएककालीनेत्यादिरूपवैशिष्ट्यावच्छिन्नस्यघटत्वादेःसमवायेनघटादौसत्वेनतादृग्प्रतीत्यनिर्वाहादित्याहवैशिष्ट्यविरहेघटत्वपटत्वयोरुभयत्वेनआभावस्यप्रत्यक्षसिध्यत्वादिति। ननुतथापिव्यासज्यवृत्ते॥ सि॰ शिव

निरुक्तोभयत्वेनसाध्येनमूर्तत्वस्यव्यभिचारितासंभवति एकप्रतियोगिमत्त्वेपिअभावस्यप्रतियोगिसामानाधिकरण्यान्मूर्तत्वाधिकरणेमनसिउभयाभावस्यप्रतियोगिव्यधिकरणत्वाभावात्। हेतुमतिप्रतियोगिव्यधिकरणस्यैवसाध्याभावस्यव्यभिचारित्वात्। व्यभिचारलक्षणेपिप्रतियोगितावच्छेदकावच्छिन्नवैयधिकरण्यपर्यंतस्यानिवेशादित्याशंक्यानिरस्यति। नचतत्रेत्यादिना। व्याप्तिरेवंतथाचेतिः। मूर्तत्वस्यननसिसत्वेपीत्यर्थः। उभयत्वेनेति। उभयत्वविशिष्टवत्तायामनुमित्यादित्यर्थः। तथाचतत्रोभयत्वविशिष्टवैशिष्ट्यविषयकानुमितेर्भ्रमत्वयातत्रयोजकहेतोर्नसत्येतुत्वस्वीकारसंभवः। अतएवव्यभिचारलक्षणेपिप्रतियोगितावच्छेदकावच्छिन्नवैयधिकरण्यपर्यंतमवनिवेश्यमितिभावः। एकाधिकरणेउभयत्वविशिष्टासत्वेमानमाह। नात्रोभयमितिअत्रोभयमितिप्रतीत्यभावोनहेतुतयोक्तः। उभयत्वेनैकस्यसत्वोपगमेउभयत्राधिकरणवृत्तिजातादृशप्रतीतिविषयतयाएकस्मिन्नधिकरणवृत्तिजातावभावेनतादृशप्रतीतेर्भ्रमत्वस्यावश्यकत्वात्तादृशप्रमाविरहोपपत्तेः। हेनेप्रतियोग्यसामानाधिकरण्यस्यभावविशेषणत्वेलक्षणेत्यंतपदवैय्यर्थ्यंधूमाद्यधिकरणनिष्ठवह्न्यादिभेदस्यप्रतियोगिसामानकरणत्वेनैवसाध्यतावच्छेदकतायाप्रतियोगितावच्छेदकतायाअकिंचित्करत्वोद्दित्साक्रमायासाप्रदायिकोघटर्द्धितमत्यंतपदप्रयोजनमाह। त्यंतपदेचेति। अत्यंताभावात्वनिरूपकप्रतियोग्यसामानाधिकरण्यास्येति। लाभायेत्यग्रिमेणान्वयः। स्वस्यप्रतियोगिनोअत्यंताभावस्तादृशप्रतियोग्यसामानाधिकरण्यपर्यंतस्याभावविशेषणत्वलाभायेत्यर्थः। अत्यंताभावत्वनिरूपकप्रतियोगितायाइति। प्रतियोगितावच्छेदकेत्यत्रयाप्रतियोगितानिविष्टातत्रात्यंताभावत्वरूपानुयोगितानिरूपकत्वविशेषणस्यलाभायेत्यर्थः। क्रमेणव्याचष्टेमाह। अन्यथेति। सर्वस्यैवाभावस्येति॥

हेतुसमानाधिकरणभावत्वेनोपादेयस्यसर्वस्यगोत्वाद्यभावस्येत्यर्थः॥स्वसमानाधिकरणाभावांतरभिन्नत्वात्।स्वसमानाधिकरणतादृशघटत्वाभावभेदवत्वादि
त्यर्थः।स्वस्वरूपातिरिक्तत्वात्गोत्वाद्यभावरूपाधिकरणस्वरूपत्वात्अभावाधिकरणकाभावप्रतियोगिकाभावस्याधिकरणीभूताभावस्वरूपतेतिसिद्धां
तादितिभावः।प्रतियोग्यसमानाधिकरणाभावस्यदुर्लभत्वापत्तेरितिगोत्वाद्यभावानामत्यंताभावत्वनिरूपकगोत्वादिरूपप्रतियोग्यसमानाधिकरणत्वेपिस्व
निष्ठभेदत्वनिरूपकघटत्वाद्यभावप्रतियोगिसमानाधिकरणत्वनियमादितिभावः।प्रतियोगितावच्छेदकसंबंधेनप्रतियोग्यसामानाधिकरण्यनिवेशेसर्वत्र
नतादृशाभावप्रसिद्धिः किंतुविशेषणसाध्यतास्थलेतन्मतेभावेसाध्यतावच्छेदकसंबंधावच्छिन्नप्रतियोगिताकत्वस्यनिवेश्यत्वात्साध्यतावच्छेदकसंबंधस्यतत्रनि
वेशोपितत्रैवतदप्रसिद्धिरित्याशयेनात्यंताभावत्वनिरूपकप्रतियोग्यसामानाधिकरण्यनिवेशेपिसर्वेषामेवाभावानांकिंचिद्विशिष्टस्वाभावरूपत्वेनाभाव
निरूपकप्रतियोगिसामानाधिकरण्यनियमात्तदसमानाधिकरणाभावाप्रसिद्धेरयादृशप्रतियोगितेत्यादिनावक्ष्यमाणदीतरनुसरणाप्रतियोगिन्यत्यंताभाव
त्वनिरूपकत्वनिवेशवैय्यर्थ्यमत्राक्षरसबीजमेवहेतुसमानाधिकरणेति।हेतुसमानयोत्यंताभावप्रतियोग्यसामानाधिकरण्यवान्गोत्वाभावोहृदयघटत्वाभावादि
रूपसाध्यस्वतन्त्रिष्ठस्वभेदात्मकस्वतत्स्वप्रतियोगित्वादित्यर्थः।अभावसाध्यकेति।घटित्वाभावादिसाध्यतघटत्वादिसाधनेत्यर्थः।अत्यंताभावत्वनिरूपकप्रतियो
गितानिवेशेपिसंबंधातरावच्छिन्नसाध्यात्यंताभावप्रतियोगितावारणायसाध्यतावच्छेदकसंबंधावच्छिन्नत्वनिवेशोध्येयएतद्विशेषणमनर्थकं।साध्यतावच्छे
दकसंबंधेनप्रतियोग्यसामानाधिकरण्यनिवेश्यसंबंधांतरावच्छिन्नाभाववारणेपिसर्वत्रैवाभावेपूक्तरीत्यात्यंताभावत्वनिरूपकप्रतियोगिसामानाधिकरण्यस्था ।२।३
पिसत्वेनप्रस्तुतप्रतियोगितावत्सामानाधिकरण्यस्यैवनिवेश्यतयासाध्यनिष्ठप्रतियोगितात्रयासामानाधिकरण्यस्यसत्वेधिकरणेतत्तावद्विशिष्टाभावेअस
त्वेनाव्याप्त्यप्रसक्तेरित्यस्वरसबीजं।संप्रदायानुमतात्यंताभावत्वनिरूपकप्रतियोगितानिवेशपक्षेअतिव्याप्तिमाशंकते।अथेत्यादिनायद्योगोत्वमितिकालिकसं

धेनगोगोत्वयोर्हेतुसाध्यत्वलाभायअयंगोमान्गोत्वादितिप्रतिज्ञाहेतुअनभिधायकालिकसंबंधावच्छिन्नवृत्तिबोधकशब्दप्रत्ययघटितोदाहरणाभिधानं।एवमग्रेपि प्र
लयस्यापिव्यभिचारनिरूपकहेतावधिकरणस्यात्यादिः।ध्वंसवत्वेनात्यंताभावानाधिकरणत्वादिति।प्राचामनुमतंध्वंसप्रागभावयोरत्यंताभावविरोधित्वमाहत्यए
तदेवाग्रेनिराकृत्यसमाधेयंअथकालिकसंबंधेनध्वंसवत्यपिकालेअत्यंताभाववृत्तावविरोधः।महाकालाकाशेसुमवायादिसंबंधेनरूपात्यंताभावस्यसर्वानुमतत्वो
त्।नचकालिकसंबंधावच्छिन्नगवात्यंताभावस्यतत्संबंधावच्छिन्नगोध्वंसात्यंताभावरूपतायाअत्यंताभावस्यत्रियंप्रतियोगिकत्वमंगीकुर्वणैःप्राचीनैरुपगमात्
कालिकसंबंधरूपप्रतियोगितावच्छेदकसंबंधेनगोध्वंसवतितत्संबंधेनगवात्यंताभाववृत्तिर्नतेषामनुमतेतिवाच्यं।एवमपिकालिकसंबंधेनप्रतियोगिमत्यर्पितेन
संबंधेनात्यंताभावस्यकालिकसंबंधेनहत्तावविरोधात्तेनसंबंधेनप्रलयेवर्तमानमत्यंताभावमादायाति व्याप्तिवारणसंभवात्अभावस्यसंबंधविशेषनिवेशप्रयोजनवि
रहात्।नचप्रतियोग्यसामानाधिकरण्यनाघटितव्याप्तेरनुमित्योपयिकीतद्विशेषणानुपस्थितिदशायांअनुमितेरनुभविकतायावश्यमाणत्वात्तत्रचाभावस्यसंबंधविशे
षोअवश्यमवदेयः।अन्यथाहेतुमतिकालिकसंबंधेनवर्तमानंसाध्याभावमादायाव्याप्तेरितितादृशव्याप्तेरेवोक्तस्थलेप्रमात्वपरोयंग्रंथइतिवाच्यंयत्रहेतुमतिसाध्या
भावःकालिकादिसंबंधेनवर्ततेतत्रयोग्यसामानाधिकरण्यगर्भव्याप्तेरेवसत्वेतुतान्निर्वाहात्॥प्रतियोग्यसामानाधिकरण्यगर्भव्याप्तिग्रहस्यतत्रभ्रमत्वेपिप्रमागर्भत्वेनप्रमो
पयोगमपेक्षतिविरहात्
तादृशव्याप्तावपिअभावस्यसंबंधविशेषाप्रवेशात्॥मैवं।प्रतियोग्यसामानाधिकरण्यानुपस्थितिदशायांसत्तावान्द्रव्यत्वात्॥इत्याद्यापत्तावपिअभावस्यानुमितिरनुभवसि
द्धानानुरोधेनभावसाध्यकैरैदंपर्यकविशेषणतावश्यंविशेषणमहत्तिलक्षणगर्भयाअपिव्याप्तेरनुमितिप्रयोजकतावाच्यं।तथासतितादृशव्याप्तिभ्रमामादायोक्तस्थलेअनुमितिप्र
संगपरतयाएतद्ग्रंथस्यसामंजस्यात्।नचअन्योन्याश्रयसंबंधविशेषगर्भप्रतियोग्यसामानाधिकरण्यगर्भव्यभिचारग्रहविरोधित्वेनप्रतियोग्यसामानाधिकरण्यगर्भतदग
र्भव्याप्तीअनुगमप्यतएवानुमित्योपयिकतायावक्तव्यतयाअभावीयसंबंधविशेषघटितव्याप्तिग्रहस्यतादृशग्रहप्रतिबंधकयातादृशव्याप्तेर्नानुमित्युपयोगितानिर्वा
हइतिवाच्यं॥तादृशव्याप्तिसंग्रहायवभावीयसंबंधविशेषघटितप्रतियोग्यसामानाधिकरण्यघटितव्यभिचाराग्रहविरोधित्वेनव्याप्तीनामनुगमनीयत्वात्॥तावताप्यभावीयसंबंध

विशेषघटितप्रतियोग्यसामानाधिकरण्याघटितव्यासेरपिसंग्रहसंभवात्। एवंसत्यव्यावर्तकाभावीयसंबंधविशेषघटितप्रतियोग्यसामानाधिकरण्यघटितव्याप्तिज्ञानादध्वनुमितिः स्यादितिचेत्। इष्टमेवैतत्। एवंसतिप्रतियोग्यसामानाधिकरण्यमात्रार्थाभावीयसंबंधविशेषघटितव्याप्तिप्रमाणाघुक्तस्थलेनुमितिप्रसंगोदुर्वारइतिचेत्। काशंतिरत्रमकं। वस्तुतस्तु। दिधिषितरूपास्वयंनिष्कर्षणीयेहेतुमतिप्रतियोग्यनधिकरणत्वनिवेशकल्पेप्रतियोगिव्यधिकरणत्वघटितव्याप्तावभावीयसंबंधविशेषनिवेशस्यनिष्प्रयोजनत्वेप्यतिप्रसंगात्। इत्यादौप्रतियोग्यनधिकरणगुणादिवृत्तित्वविशिष्टस्याप्रसंयोगाद्यभावस्यकालिकसंबंधेनाहेत्वधिकरणकालवृत्तित्वेअव्याप्तिप्रसंगात्। एकसंबंधेनैकाधिकरणवृत्तित्वविशिष्टस्याप्यन्यसंबंधेनाधिकरणांतरवृत्तित्वात्। प्रतियोगीसमानाधिकरण्याभावनिवेशकल्पेपिगुणादेस्तद्विशिष्टस्यसंयोगाद्यभावस्यकालिकसंबंधेनकालवृत्तित्वात्। तत्कल्पेप्यव्याप्तेरावश्यकत्वात्। नचप्रतियोगिसमानाधिकरण्यविशिष्टस्यतस्यकालवृत्तित्वेप्रतियोगिसमानाधिकरण्याभावविशिष्टस्यनतद्वृत्तित्वसंभवः। भावाभावविशिष्टस्यैकाधिकरणवृत्तित्वेप्रतियोगिसमानाधिकरण्याभावविशिष्टसंयोगाद्यभावस्यदैशिकविशेषणतयापिदेवदत्तित्वादिप्रसंगात्। इतिवाच्यं। विरोधिनोर्भावाभावयोः कालिकसंबंधेनैकाधिकरणवृत्तितावच्छेदकाभावविशिष्टस्यापिकालिकसंबंधेनैकत्रवृत्तेर्विरोधाभावात्। यद्यप्यभावस्यदैशिकविशेषणतासंबंधनिवेशेअभावस्याध्यक्षेव्यभिचारिणोभावस्यदैशिकविशेषणतासानभ्युपगमेअतिव्याप्त्यासाध्यनिरूपितप्रतियोगितावच्छेदकसंबंधनिवेशेसमवायसंबंधावच्छिन्नजात्यभावसाध्यकेजातित्वादिहेतावव्याप्तिर्जात्यादिरूपहेतुमतितादृशसमवायसंबंधेनवृत्तेरसिद्धेः तथापिसाध्यनिरूपितप्रतियोगितावच्छेदकसंबंधावच्छिन्नसंबंधेनयासाध्याभाववृत्तिस्तदन्यहेतुमद्वृत्तेः प्रकृतप्रतियोगितानिरूपितानुयोगितावच्छेदकसंबंधेनहेतुमद्वृत्तेर्वाअभावविशेषणत्वेपगमात्नदोषः॥

उक्तस्थलेहेतुमतिकालेकालविशेषवृत्तित्वविशिष्टनित्यस्यात्यंताभावप्रसिध्याअतिव्याप्तिसंगतिः॥अत्यंताभावत्वघटकनित्यत्वंपरित्यज्यध्वंससाधारणसंसर्गाभावत्वनिवेशेमहाप्रलयेगोत्वरूपसामान्यधर्मावच्छिन्नप्रतियोगिताकध्वंसोपगतमतेध्वंसमादायातिव्याप्तिरुक्ततेवारयितुंदुर्वारेत्याशंक्याह॥संसर्गाभावेति॥दैशिकविशेषणतयापिध्वंसस्यकालवृत्तित्वमित्याशयेनोक्तरीकासंगतिः॥अन्यथाअभावस्यतादृशसंबंधेनवृत्तिनिवेशेअत्यंताभावमिवध्वंसमप्यादायअतिव्याप्तेर्दुर्वारत्वात्॥नचप्रतियोग्यधिकरणमहाकालेगोध्वंसस्यदैशिकविशेषणतासत्वेपिप्रतियोग्यनधिकरणप्रलयेतत्स्यतादृशसंबंधेप्रामाणिकवृत्तिर्वाच्या॥यदुपाधिविशिष्टस्यप्रतियोग्यधिकरणत्वंतदन्योपाधिविशिष्टस्यैवमहाकालस्यतदभावाधिकरणतयामहाकालस्यदैशिकविशेषणतयाध्वंसवत्तेप्रलयात्मकोपाधेरपितादृशसंबंधेनतदाधारतायाआवश्यकत्वात्॥अन्यथाप्रलयेगौर्नास्तीतिव्यवहारानुपपत्तेः॥अथवादीधितिकृन्निष्कर्षणीयप्रतियोगिवैयधिकरण्यकल्पाभिप्रायेणेदं॥तत्कल्पेप्रयोजनाभावादं॥वैयवृत्तिविरोधानिवेशात्॥नचाभाववृत्तिविरोधानिवेशेकालिकसंबंधेनगवात्यंताभावस्यापिप्रलयेवृत्तेः संसर्गाभावमात्रपरत्वोक्तिविरोधइतिवाच्यं॥प्रतियोगितावच्छेदककालिकसंबंधेनतत्प्रतियोगिनाध्वंसस्यहेत्वधिकरणेअबाधात्॥गोत्वात्यंताभावस्यप्रतियोगिव्यधिकरणत्वाभावात्॥ध्वंसस्यतत्प्रतियोगिनोऽत्यंताभावस्यप्रतियोगितावच्छेदकदैशिकविशेषणतासंबंधेनकालेसत्वात्॥प्रतियोगिव्यधिकरण्यमक्षतमेवयदास्पदइति॥अत्रचव्यभिचारनिरूपकाधिकरणंखंडप्रलयः॥जन्यद्रव्यानधिकरणेतस्मिन्द्व्यणुकासत्त्वात्। पुनर्द्व्यणुकोत्पत्त्यानुरोधेनपरमाणूनास्पदस्वीकारस्यावश्यकत्वात्। तथाचेहेत्वधिकरणेतत्र द्व्यणुकसामान्यध्वंसप्रागभावयोरसत्त्वादितिभावः॥द्व्यणुकनाशानुपयोगिक्रियायाः उत्तरसंयोगनाश्याधिकरणेचरमपरमाणुसंयोगनाशेरूपमहाप्रलयपूर्वंतृतीयक्षणेद्व्यणुकसामान्यध्वंससत्त्वादव्याप्तिः नविचारसहेत्युपेक्षोदाहृतेति॥ज्ञानत्वमात्रेणसाध्यतायांप्रलयेईश्वरज्ञानसत्त्वात् अयंसहेतुरवेत्यतोदुरवेति॥जन्यमात्रंप्रत्यदृष्टस्यहेतुतयामहाप्रल

१४ जन्येतिनित्यसुखाभिव्यक्तिर्मुक्तिरितिमतेखंडप्रलयेपिमुक्तात्मनिजन्यज्ञानसत्त्वात्तत्प्रेतुसंभवतीत्यतोx १

याव्यवहितप्राक्क्षणेपितज्ज्ञानकीभूतादृष्टस्यावश्यकत्वमितितदाजन्यज्ञानत्वसुखदुःखत्वाद्यवच्छिन्नध्वंससत्त्वान्नोपदर्शितस्थलेऽतिव्याप्तिःसंभवतीत्यतः दिं. लु. स्थलान्तरमाह॥ यद्यतस्तस्मिन्॥ यद्यतस्तस्मिन्समवेतादृष्टनमनाप्रत्यक्षजनकसंसर्गेणविवक्षितः॥ व्यभिचारश्चात्रखंडप्रलयेसुषुप्त्यादौचबाधः॥ खंडप्रलीनद्व्यणुकादिध्वंसस्यद्व्यणुकादिरूपसामान्यधर्मावच्छिन्नप्रतियोगिताकत्वासंभवंव्युत्पादयति॥ नहीति॥ तयोर्ध्वंसप्रागभावयोः॥ सामान्याभावत्वमतेपि॥ सामान्यधर्मावच्छिन्नप्रतियोगिताकत्वमतेपि॥ ध्वंसप्रागभावयोरत्यंताभावविरोधित्वमतेननयास्तथात्वमित्येतत्सूचयितुंमतेपीति॥ एकविशेषेपि॥ एकविशेषप्रागभावत्वेनसामान्यावच्छिन्नाध्वंसस्यविशेषांतरध्वंसत्वेनसामान्यधर्मावच्छिन्नप्रागभावस्यसंभवइतिअर्थः॥ अन्यथानानिरुक्तइतिधर्मस्यैवावच्छेदकतयातत्कालीनध्वंसादिप्रतियोगिताश्रयानागतादिसाधारणधर्मस्यनादृशप्रतियोगितावच्छेदकत्वासंभवादितिभावः॥ यद्यप्येवंमहाकालध्वंसोपिगोध्वंसाश्रयैकमेकंगोव्यक्तिमात्रवृत्तिप्रतियोगिताकइतिनकस्यापिध्वंसस्यप्रतियोगितायासमनियतंगोत्वंनथापिचरमध्वंसस्यथावत्प्रतियोगिकत्वापगमेनत्प्रतियोगितावच्छेदकत्वंगोत्वस्यसंभवतीत्यभिप्रायेणसंसर्गाभावत्वनिवेशोपपत्तौउक्तस्थलमुपेक्ष्यद्व्यणुकासाधकस्पर्शादिहेतुकस्थलेऽतिव्याप्तिरीहितावस्कृतस्कध्वंसप्रागभावयोर्व्यधिकरणप्रतियोगिकत्वविरहाच्चरमगोध्वंसस्यापियावत्प्रतियोगिकत्वंनसंभवतीतिध्येयं॥ विरोधिनःप्रतियोगिनोऽधिकरणकालेएवंतद्भेदाभावोयत्रनतत्रसुतरांध्वंसप्रागभाववतिकालेप्रलयादावसौवर्तनइतिस्वचायशिवप्रतियोगिमतइवेतिदृष्टांतः॥ विरोधाभावात्॥ बाधकाभावात्॥ तथाचहेत्वधिकरणेगोत्वावच्छिन्नात्यंताभावसत्त्वेनोक्तस्थलेऽतिव्याप्तिरितिभावः॥ नचप्रलयेगोत्वावच्छिन्नाभावोऽप्रामाणिकःप्रसक्तानुमानस्याप्रयोजकत्वादितिवाच्यं॥ प्रलयेगोनास्तीतिशास्त्रस्यैवप्रमाणत्वात्॥ नहितादृशावाक्यस्यप्रामाण्यंकश्चिदुपेति॥ नचध्वंसादिरेवनघटार्थोनायंताभावइतिवाच्यं

अन्यथितावच्छेदकस्यानाधिकरणप्रतियोगिताकाभावमात्रस्यनत्वाप्रतिपादनेऽतिप्रसंगात्तदवच्छिन्नप्रतियोगिताकाभावबोधकतायाएवव्युत्पन्नतयाऽत्यंताभावमात्रस्यसामान्यधर्मावच्छिन्नप्रतियोगिताकत्वमुक्तंध्वंसादेर्नत्वाप्रतिपादनासंभवात्॥ अन्यथा॥ प्रतियोगिमतितध्वंसप्रागभाववृत्तिचकालेकालिकसंबंधावच्छिन्नप्रतियोगिताकात्यंताभावस्यादृष्टौ॥ अत्यंताभावस्यातादृशात्यंताभावस्याकालमात्रावृत्तित्वेतिदेशिकविशेषणमित्यादिः॥ ननुध्वंसप्रागभाववृत्तिअत्यंताभावदृष्टांतस्यतदविरोधितावत्प्रतियोगिमतितद्दृष्टांतस्यप्रतियोग्यविरोधितायाप्यपेक्षितत्वाविशेषादित्यतआह॥ इत्यास्तिति॥ एकस्यप्रतियोगिमतःकालस्यादेराभेदावच्छिन्नप्रतियोग्यनवच्छेदकदेशावच्छिन्नात्यंताभावत्वंतथात्वादेशिकसंबंधेनकालिकसंबंधावच्छिन्नात्यंताभावत्वंतथात्वप्रतियोग्यभावयोरेकावच्छेदेनैकत्रावर्तमानत्वविरोधितावतापर्याप्तमेवेतिभावः॥ अपरस्यध्वंसादिमतःस्वरूपावच्छिन्नध्वंसाद्यधिकरणतावच्छेदकरूपावच्छिन्नंनतथात्वमिसनुषज्यते॥ नथाचैकावच्छेदकावच्छिन्नंनैकत्रावर्तमाननयाध्वंसाद्यविरोधितेमत्यंताभावस्येतिभावः॥ ननुकालोऽपिदेशोदेशस्यावच्छेदकत्वेकिंमानमितिसन्नाह॥ देशोकालस्येति॥ नयथादेशोदैशिकसंबंधावच्छिन्नाभावस्यदेशोकालस्यावच्छेदकत्वमिदानींमत्रगोर्नास्तीत्यादिप्रतीतिबलान्नथाकालेकालिकसंबंधावच्छिन्नाभावस्यदेशादिविरोधित्वेपिकालस्यावच्छेदकत्वंरूपकत्वंनथाप्रतीतिचलादित्वादृष्टाप्रतीतेःकालावच्छेदेनदेशादृत्तिर्दृष्टावच्छेदेनकालवृत्तिर्वाविषयइत्यत्रविनिगमकाभावात्अवच्छेदकतालाघवाधिकरणत्वयोरुभयोरेवसुलभ्यत्वादितिभावः॥ प्रतियोगिमत्यधिकालेगवात्यंताभावस्यवृत्तौनतस्यासेमानाधिकरण्यातेनूवारणात्॥ कथंतर्हादायोक्तातिव्याप्तिर्वार्यतेतिचेत्तत्राह॥ तच्छून्येचेति॥ प्रतियोगिशून्येप्रलयादावित्यर्थः॥ तदभावस्यगवात्यंताभावस्यप्रतियोगिव्यधिकरणत्वात्॥ प्रतियोगिसामानाधिकरण्याभावत्वोक्तेः॥ सामानाधिकरण्यस्याव्याप्यवृत्तितामतएवप्रतियोगिसामानाधिकरण्याभावस्याभावविशेषणत्वात्॥ अन्यथासंयोगिसत्त्वादृष्टावतिव्याप्तिःतस्यव्याप्यवृत्तितापक्षेचप्रतियोग्यनधिकरणवृत्तित्वस्यैवनिवेशनीय

तयाप्रलयादिदृत्तिगवासंतानाभावस्यान्यत्रप्रतियोगिसमानाधिकरणेपिलक्षणघटकलाव्याघातादितिभावः॥संसर्गाभावत्वतद्बुद्धितासंतानाभावत्वयोर्व्यभिचारितेनानवस्थामाशंकते॥नचेतिसंसर्गाभावविशेषः॥सदातनसंसर्गाभावः॥संसर्गारोपः॥तादात्म्यातिरिक्तसंबंधेनप्रतियोग्यारोपः॥तद्बुद्धत्वादितिचेति॥स्वव्यहितपूर्वक्षणावच्छेदेनतद्बुद्धौअन्यस्मिन्वर्तमानयत्तदन्यत्वंतदर्थः॥तत्रजन्यत्वोपलक्ष्यार्थेसप्तमी॥नियमांतरस्याअविशिष्टधीव्यावृत्तावविशिष्टधी

नियमनकल्पसंबंधेनघटकनियमस्य॥अत्रसंसर्गाभावत्वमूलारीरे॥नक्षतिरितिचेतद्बुद्धत्वादितिरूपनियमस्यैव॥तत्रप्रवेशनीयतयादितिभावः॥स्वमतेनियमानंतर्भावस्यानुपदंवक्ष्यमाणत्वादाहुरित्युक्तं॥नियमाघटितमितिचेति॥आरोपस्याभावबुद्धिहेतुतायानिर्मुक्तिकल्पतादात्म्यातिरिक्तसंबंधावच्छिन्नप्रतियोगितानिरूपितत्वसंसर्गाभावत्वस्यैवसंसर्गाभावत्वरूपत्वादितिभावः॥प्रयोजनविरहदूषितेति॥साध्यतावच्छेदकसंबंधेनयादृशप्रतियोगितावच्छेदकत्वंतस्यनिवेशनीयतयाअन्योन्याभावत्वादिनिरूपकप्रतियोगितामादायदोषाप्रसक्तेरितिभावः॥प्रतियोगितावच्छेदकसंबंधेनप्रतियोगिवैयधिकरण्यनिवेशनकल्पमभिप्रेत्याह॥अत्राप्तिश्चेतिचेति॥तन्मतेसंबंधांतरावच्छिन्नसाध्याभावमादायदोषवारणायसाध्यतावच्छेदकसंबंधावच्छिन्नसंसर्गाभावप्रतियोगित्वप्रसिध्याअव्याप्तिरित्यापद्यतइत्यर्थः॥द्विगुणाधीनाद्विगुणत्वावच्छेदकत्वमेवनत्वधिकरणत्वमितिमतेमनसोमूर्तत्वेवनदेहीत्यविशेषणतयाअधिकरणत्वमितिदृश्यत्वमात्रस्यहेतुत्वेमनोरूपहेत्वधिकरणएवसाध्याभावः॥प्रतियोग्यधिकरणइतिनातिप्रसंगइत्यतोमनीत्येति॥साध्यशून्यानामपीति॥साध्यतावच्छेदकसंबंधेनेत्यादिः॥एवमधिकरणत्वांतेसंबंधिवैयधिकरण्येअन्योन्याभावोपीति॥तथाचतादात्म्यसंबंधेनसाध्यतायामव्याप्तिरितिभावः॥तद्विशिष्टस्यप्रतियोग्यसामानाधिकरण्यावच्छिन्नस्यानेनेति॥कपिसंयोग्येतद्वृक्षत्वादित्यादौकपिसंयोगरूपसाध्याभावस्यगुणादौप्रतियोगिसामानाधिकरण्याभावत्वेपिहेत्वधिकरणीभूतवृक्षादेर्नकपिसंयोगसामानाधिकरण्याभावविशिष्टकपिसंयोगाभावत्वंयत्रसामानाधिकरण्याभावविशिष्टत्वंतत्रतद्भावविशिष्टाधिकरणत्वप्रत्ययात्॥अतःसाध्याभावीयनिरूपणघटकत्वेनाव्याप्तिरितिभावः॥हेत्वधिकरणावच्छेदेनप्रति

योगिसामानाधिकरण्याभावनिवेशानव्याप्तिवारणस्यसुकरत्वेपिमूलोपात्तहेतुसामानाधिकरण्यनिवेशोवक्ष्यर्थंभियानतथाविवक्षितंसार्वभौमंनप्रतियोग्यसामानाधिकरण्यावच्छेदकीभूताधिकरणावच्छिन्नहेतुसामानाधिकरण्यस्यचाभावविशेषणत्वमुपेक्ष्यउपाध्यायमतेप्रतियोग्यसमानाधिकरणत्वरूपविशेषणवैशिष्ट्यनिवेशनएवलाघवमित्यालोच्यतदनुयायिनादीधितिकारेणप्रतियोग्यसामानाधिकरण्यावच्छिन्नहेतुसामानाधिकरण्यनिवेशितंयथाश्रुतमूलउपमेवार्थेःप्रतियोग्यसामानाधिकरण्यहेतुसामानाधिकरण्ययोरुद्देश्यतावच्छेदकविधेयभावस्यविवक्षितत्वादुद्देश्यतावच्छेदकविधेययोरवच्छेद्यावच्छेदकभावलाभस्यचमुत्पत्तिसिद्धत्वात्॥प्रतियोग्यसामानाधिकरण्यस्यहेतुसामानाधिकरण्यावच्छेदकत्वेप्रतियोग्यसामानाधिकरण्यरूपहेतुतावच्छेदकावच्छिन्नसंयोगाभावादेःसत्वादिसाध्यत्वप्रसंगःसत्वादिसामानाधिकरण्यावच्छेदकरूपवत्वस्यसत्तादिव्याप्यत्वादितिसार्वभौमोक्तदूषणप्रतन्मतेनिरवकाशोतात्पर्यादस्याग्रहेणनपरिभाषकस्यैवावच्छेदकत्वस्यविवक्षितत्वात्तादृशस्यचतथानिर्वहहेतुतावच्छेदकमारूढत्वात्॥अन्यथाविषयितासंबंधेनघटत्वावच्छिन्नस्यज्ञानत्वादिव्याप्यतायादुर्वारत्वात्॥तादृशसंबंधेनज्ञानत्वादिसामानाधिकरण्येज्ञानविषयतारूपघटत्वादेरवच्छेदकत्वात्॥नन्वव्याप्यवृत्तिसाध्यकत्वात्तिवारणायप्रतियोगिसमानाधिकरणभिन्नत्वरूपप्रतियोग्यसमानाधिकरणत्वमेवनिवेश्यतांकिमुक्तविवक्षयागुणादौप्रतियोगिसामानाधिकरण्याभावतोपिकपिसंयोगाभावादेःप्रतियोगिसमानाधिकरणभिन्नत्वविरहात्तद्भेदस्याव्याप्यवृत्तित्वानुपगमात्इत्यतआह॥तद्बुद्धीतिचेति॥प्रतियोगिमद्बुद्धीत्यर्थः॥नार्थः॥नप्रतियोग्यसमानाधिकरणपदेनविरक्षित॥अव्याप्यवृत्तीति॥कपिसंयोगीसत्वादित्यादावित्यर्थः॥अतिप्रसंगादिति॥संयोगरूपसाध्याभावस्यद्रव्यादौप्रतियोगिसमानाधिकरणत्वयातद्भिन्नत्वविरहेणलक्षणाघटकत्वादितिभावः॥अत्रचसामानाधिकरण्यस्याव्याप्यवृत्तितायाःप्राक्स्वयंदूषितत्वात्प्रतियोगिसामानाधिकरण्याभावनिवेशोपक्षेप्यतिव्याप्तिवारणमशक्यइत्यतादृशानुपपत्तिमेवयद्वेत्यादिकल्पांतरानुसरणंवी

जयतयाव्याचष्टे।अत्रचेति।असामानाधिकरण्यनिवेश्यकत्वेचेत्यर्थः।इत्यस्वरसादित्यतेनान्वयः।प्रतीतेः।संयोगाभावेगुणेनसंयो
गसामानाधिकरण्यमित्यादिप्रतीतेः।अन्यथागुणादिनिष्ठसामानाधिकरण्यावच्छेदकत्वाद्यभावविषयकतयाननूक्तसंयोगी
एतत्वादित्याद्यव पिकपिसंयोगादिरूपसाध्याभावस्यप्रतीयोगिवेयधिकरण्यावच्छेदकगुणादिवृत्तित्वावच्छिन्नतयालक्ष
णघटकतेवेत्यभ्युपेत्याहतच्चेति।प्रतियोगिवेयधिकरण्यंचेत्यर्थः।हेत्वधिकरणेहेत्वधिकरणनिरूपितंएतत्कल्पेच
पृथग्ध्येतुसामानाधिकरण्यनिवेश्यमेवेतिभावः।एवंचहेत्वधिकरणनिरूपितप्रतियोग्यनधिकरणवृत्तित्वमेवाभावेविशेष
णंदेयंनतुतदवच्छेदकावच्छिन्नत्वंअनतिप्रयोजनकत्वाच्चोप्रतियोग्यनधिकरणनिरूपितत्वहेत्वधिकरणनिरूपितत्वयो
र्निवेशापक्षयातत्रहेत्वधिकरणनिरूपितत्वस्यचहेत्वधिकरणचप्रतियोग्यनधिकरणत्वनिवेशेलाघवमित्यालोच्य
तथैवनिष्कर्षयति।।प्रतियोग्यनधिकरणीभूतेति।।प्रतियोगितावच्छेदकावच्छिन्नानधिकरणेत्यर्थः।।नेत्यननदर्शितातिमा
प्तिःयस्यकस्यचिदित्यादिषष्ठ्यंतानांअनधिकरणत्वमित्यननान्वयः।।प्रतियोगितावच्छेदकावच्छिन्नस्ययस्यकस्यचिद
नधिकरणत्वंस्वप्रतियोगितावच्छेदकावच्छिन्नाधिकरणप्रतियोगिकभेदमात्रंतत्सामान्यस्यानधिकरणत्वंस्वप्रतियो
गितावच्छेदकत्वेनानुगतीकृतप्रतियोगितावच्छेदकावच्छिन्नाधिकरणत्वावच्छिन्नभेदःप्रतियोगितावच्छेदकयत्किंचि
दितिप्रतियोगितावच्छेदकंतत्तच्चक्तित्वेननिवेश्यतदवच्छिन्नाधिकरणत्वावच्छिन्नभेदोवाविवक्षितइत्यर्थः।।नन्वभ
तेसंयोगसामान्याभावस्यकेवलान्वयितयातत्रसाध्येसत्तादिःसाधनुरेवइत्यतआहसंयोगत्वाभावेत्याद्यु।।तत्प्रतियोगीति।।
संयोगरूपसाध्याभावप्रतियोगीत्यर्थः।।तत्तत्संयोगत्वावच्छिन्नाभावाभावस्यतत्तत्संयोगादेःसंयोगसामान्यान्तरि

क्तत्वादितिभावः।।द्रव्यत्वरूपाभावस्यैकव्यक्तिकतयाव्यक्तिविशेषाभावरूपप्रतियोगिसामानाधिकरण्यंनघटतेइ
त्यतःतस्यकिंचिद्विशिष्टस्याभावरूपप्रतियोगिसामानाधिकरण्यमाह।।नित्यत्वादिति।।आदिनाजन्यत्वादिपरिग्रहः।।
ननुविशिष्टाभावोविशिष्टस्यैवद्रव्यत्वस्यप्रतियोगीनतुशुद्धस्यैतिकथंशुद्धद्रव्यत्वस्यप्रतियोगिवेयधिकरण्यानुपपत्तिरित्यतआहासा
भावेति।।नचसर्वस्यैवाभावस्यपूर्वक्षणादिवृत्तित्वविशिष्टस्याभावरूपप्रतियोगिसमानाधिकरणतयाप्रतियोगिअधिकर
णाभावाप्रसिध्यानातिप्रसंभवइतिचाच्यं।।प्रतियोगितावच्छेदकसंबंधेनप्रतियोगिवेयधिकरण्यनिवेशापक्षेऽसंभव
स्यसाध्यतावच्छेदकसंबंधेनतद्वैयधिकरण्यनिवेशापक्षेस्वरूपसंबंधावच्छिन्नसाध्यकस्थलेसाध्यतावच्छेदकसंबंधेनसर्व
षामेवाभावानांप्रतियोगिसामानाधिकरणत्वादव्याप्तेःप्रसक्तत्वायत्संबंधेनस्वप्रतियोगितावच्छेदकावच्छिन्नानधिकरणत्वं
हेतुमत्तत्संबंधावच्छिन्नतद्भावीयप्रतियोगितायांसाध्यतावच्छेदकसंबंधावच्छिन्नत्वंसाध्यतावच्छेदकधर्मावच्छिन्नत्वंवा
याभावएवविवक्षणीयःएवंचोक्तस्थलेस्वरूपसंबंधेनप्रतियोग्यनधिकरणत्वंप्रसिध्यतिसंयोगादिसंबंधेनघटा
द्यभावीयप्रतियोग्यनधिकरणीभूतहेतुमन्निष्ठघटाद्यभावीयप्रतियोगितासत्त्वेस्वरूपसंबंधावच्छिन्नत्वद्रव्यत्वाभावत्वावच्छिन्न
त्वोभयाभावस्यासत्त्वात्अतिव्याप्तिरित्याभिप्रायात्।।केचित्।।स्वप्रतियोगिसामान्यानधिकरणहेत्वधिकरणकत्वे
नगगनाभावएवतादृशप्रतियोगिव्यधिकरणः।।नचस्वप्रतियोगिसामान्यांतर्गतनित्यत्वादिविशिष्टगगनाभावाभावोनास्ति
प्रत्युतात्यंताभावस्यचनित्यत्वेनित्यत्वविशिष्टागनाभावाभावत्वकल्पनेनैवोपपत्तेःगगनाभावेतदकल्पनात्नित्यत्ववि
शिष्टगगनाभावाभावस्यगगनाभावप्रतियोगित्वादित्याहुः।।तन्न।।तथापिपूर्वक्षणवृत्तित्वविशिष्टगगनाभावाभावरूपप्र

त्तियोग्यधिकरणहेत्वधिकरणकत्वेनगगनाभावस्यप्रतियोगित्यधिकरणत्वासंभवात्पूर्वक्षणावृत्तावपिपूर्वक्षणवृत्तित्व
विशिष्टगगनाभावाभावोनास्तीतिप्रत्यक्षेत्यान्पूर्वक्षणवृत्तित्वविशिष्टगगनाभावाभावाभावत्वस्यपूर्वक्षणवृत्तित्वेकल्प
यितुमशक्यत्वेनगगनाभावानतिरिक्तविशिष्टगगनाभावस्यवतत्वस्यकल्पनीयतयापूर्वक्षणवृत्तित्वविशिष्टगगना
भावाभावेगगनाभावप्रतियोगित्वावश्यकत्वादितिस्वरूपसंबंधेनगगनादेर्वृत्तिमत्वेतुनैषदोषइतिध्येयं॥आत्मनिसंयोग
सामान्याभावस्यसर्वमतसिद्धत्वविरहात्॥कपीति॥जन्यद्रव्यवृत्तिहेतुकेहेत्वधिकरणजन्यद्रव्येगुणसामान्याभावस्याधिउत्पत्तिकाला
वच्छेदेनस्वमतेसत्वात्तत्रतादृशप्रतियोगित्वेयधिकरण्यंनघटतेअतआत्मत्वहेतुकानुसरणं॥गुणसामान्याभावत्वस्यकपिसंयो
गस्वरूपाभावप्रतियोगितावच्छेदकत्वंस्फुटीकुर्तुकपिसंयोगानांगुणत्वकीर्तनं॥तत्प्रतियोगितावच्छेदकेति॥तथाचतादृशाभावअ
पियत्किंचित्प्रतियोगितावच्छेदकावच्छिन्नप्रतियोगित्वाधिकरणावृत्ततत्प्रतियोगितावच्छेदकेत्यर्थः॥कपिसंयोगाभावत्वस्येत्यत्रा
त्तिरितिभावः॥यादृशेति॥यत्प्रतियोगितावच्छेदकावच्छिन्नाधिकरणत्वावच्छिन्नभेदप्रतियोगित्वमित्यर्थः॥कपिसंयोगित्वतादात्म्या
दौयत्किंचित्कपिसंयोगादिमत्त्वेनाधिकरणत्वेपिहेतुमतःकपिसंयोगत्वावच्छिन्नप्रतियोगितावच्छेदकावच्छिन्नाधिकरणसामा
न्यभेदवत्वासंभवात्स्वपदेनतादृशीप्रतियोतोपादातुंनशक्यत्वादितिनाव्याप्तिः॥द्रव्यत्वाभाववान्सत्वादित्यादौहेतुमतोद्रव्यादेर्वि
शिष्टद्रव्यत्वाद्यभावरूपप्रतियोग्यधिकरणत्वेपिद्रव्यत्वाभावत्वावच्छिन्नायाप्रतियोगितातदवच्छेदकावच्छिन्नानधिकरणत्वात्
तस्यलक्षणघटकतेतिनातिव्याप्तिः॥कपिसंयोगाभाववानात्मत्वादित्यादौचकपिसंयोगाभावत्वावच्छिन्नायाप्रतियोगितातदवच्छेदकावच्छि
न्नाधिकरणमेवहेतुमत्किंतुगुणसामान्याभावत्वावच्छिन्नप्रतियोगितावच्छेदकावच्छिन्नानधिकरणमेवतदनवच्छेदकमेवसाध्यता

नवच्छेदकमितिनाव्याप्तिरितिभावः॥नचैवंघटत्वावच्छिन्नाभावप्रतियोगितावच्छेदकावच्छिन्नानधिकरणंधूमवत्तादृशप्रतियोगि
तानवच्छेदकंचवह्नित्वमित्याकारकस्याभावकूटस्यागृहीतेःसमूहालंबनस्यैवानुमितिहेतुतयाविशिष्टपरामर्शस्यानुमितिहे
तुत्वमनुपपन्नंअभावकूटघटिततयाव्याप्तेर्दुर्वारत्वापत्तिरितिवाच्यं॥हेतुमन्निष्ठभेदप्रतियोगितायास्तावच्छेदकावच्छिन्नवत्तसंबं
धेनअवच्छेदिकायाप्रतियोगितातदनवच्छेदकत्वस्यसाध्यतावच्छेदकविशेषणतयैवएकसामान्याभावरूपस्यानिवेशात्प
र्याप्तं॥तादृशभेदप्रतियोगितायास्तावच्छिन्नवत्तसंबंधेनानवच्छेदकत्वस्यसाध्यतावच्छेदकविशेषणतयैवसामञ्जस्येपियथो
क्तनिवेशनैयर्थ्यंतथाविधसंबंधेनतादृशभेदप्रतियोगितानवच्छेदकसाध्यतावच्छेदकावच्छिन्नसाध्यसामानाधिकरण्यमा
त्तिरितिपुनरन्योन्याभावघटितलक्षणेनिरुक्तार्थबोधः॥संबंधसामान्येनहेतुमत्वनिवेशेऽग्नेर्वक्ष्यमाणत्वात्संबंध
विशेषणहेतुमत्वंप्रतियोगितायांसंबंधविशेषावच्छिन्नत्वनिवेशोनासंभवस्यवाच्यतयातत्रतन्निवेशयति॥अत्रचेति॥ग्रा
ह्यसामानाधिकरण्येअनुमितिकरणीभूतज्ञानविषयहेतुनिष्ठसाध्यसामानाधिकरण्यशरीरेसाध्यस्यचेति॥अत्रापिग्राह्यसामाना
धिकरण्यइतिप्रविष्टइतिचानुपज्यते॥तथाचतत्संबंधेनहेतुमतिवर्त्ततेयोअभावस्तदीयतत्संबंधावच्छिन्नप्रतियोगितानवच्छेद
कोयोधर्मस्तदवच्छिन्नस्यतेनसाध्यतावच्छेदकसंबंधेनअधिकरणेतेनहेतुतावच्छेदकसंबंधेनवर्त्तमानत्वंतादृशसाध्यता
वच्छेदकसंबंधेनसाध्यनुमितिप्रयोजकमित्यर्थः॥व्यापकताघटकसाध्यीयसंबंधेनसाध्याधिकरणेतादृशसाधनीयसं
बंधेनसाधनस्यावर्तमानत्वग्रहदशायांअनुमितिवारणायसामानाधिकरण्यशरीरेसंबंधविशेषनिवेशेनवस्तुतस्तुविरु
द्धेनज्ञायमानधर्मवताज्ञानस्यानुमित्यनुत्पादकतायाःवक्ष्यमाणतयासामानाधिकरण्यशरीरेसंबंधविशेषा

निवेशोपिनक्षतिःसामानाधिकरण्यावगाहितायांप्रयोजकत्वंचविशिष्टपरामर्शनिरा
तित्वव्यापकत्वपरामर्शहेतुतायांदूषयितव्यत्वात्॥नचस्वव्यापकसाध्यहेतुमात्रित्वाकारकःसामानाधिकरण्यावगाहि
विशिष्टपरामर्शएवहेतुर्हेकरास्तामितिवाच्यं॥बहुव्रीह्यर्थस्यसामानाधिकरण्यपर्यवसितत्वादित्यवधेयं॥प्रतियो
गिवेयधिकरण्यशरीरेप्रतियोगितावच्छेदकसंबंधस्यानेसाध्यतावच्छेदकसंबंधनिवेशनएवसाध्यतावच्छेदकसं
बंधेनसाध्यवधेत्वधिकरणनिष्ठसंबंधातरावच्छिन्नसाध्याभावमादायदूषणस्यापिनिराकरणसंभवेप्रतियो
गितायांसाध्यतावच्छेदकसंबंधावच्छिन्नत्वनिवेशनमफलमित्याशयेनाह॥यद्वेत्यादि॥तादात्म्यसंबंधेनव्याप
कतानिर्वाहायप्रतियोग्यनधिकरणत्वमनुक्त्वाप्रतियोग्यसंबंधित्वमभिहितं॥ननुप्रतियोगिवेयधिकरण्य
संबंधित्वनिवेशोपितादात्म्यसंबंधेनव्याप्तिर्ननिर्वहतितादृशसाध्यतावच्छेदकसंबंधेनसाध्याधिकरणप्रसिद्ध
तद्वृत्तिसाध्यसामानाधिकरण्यस्याप्रसिद्धेरित्यतआह॥एवंस्थितइति॥प्रतियोगिवेयधिकरण्यशरीरेसंबंधित्वनिवेक
सतीत्यर्थः॥संबंधित्वंनिवेशनीयमिति॥तथाचसामानाधिकरण्यंसाध्यसंबंधिसंबंधित्वंअभावस्यहेतुसामानाधिकरण्य
मपिहेतुसंबंधिसंबंधित्वंआदिनाद्येनाधर्मिणाधूमवदादेर्वह्निमादेश्चतदेवदर्शयतितथाहि॥तादात्म्यसंबंधाव
च्छिन्नेति॥पर्वतोवह्न्यभावव्याप्यधूमवत्त्वात्महानसवदित्यत्रपर्वतोधर्मीधूमवदादेर्वह्न्यादिरूपधर्मव्याप्यत्वंवह्निमदादि
रूपधर्मिणश्चधूमादिरूपधर्मव्यापकत्वंचाह॥एवमितिं॥अतएव॥तादात्म्यसंबंधेनव्याप्तिमवस्थापनादेवतत्र २६
कत्वमिति॥पृथिवीत्वेनेतरभेदसाधनमुपयोगितयेत्यादिः॥संगच्छतेतरामिति॥अन्यथाजलादीनांसंयोगादिनापृथिव्यादिवृत्ति

यातेनसंबंधेनव्याप्तेर्जलादिभेदसाधनानुपयोगितयाचउक्तंसंगतेरितिभावः॥पृथिवीत्वाभावस्यस्वरूपसंबंधावच्छि
न्नाभावेनपृथिवीत्वरूपेणजलादिभेदःसिध्यति॥ननुतस्यसंबंधावच्छिन्नाभावेनपृथिवीत्वेनव्याप्यस्यजलादेर
न्योन्याभावःसिध्यतिनत्वत्यंताभावइत्यत्रवाकिंनियामकमित्याशंक्यायंव्यतिरेकिणितत्संबंधघटितव्यापकत्वेन
गृह्यमाणस्यतत्संबंधावच्छिन्नप्रतियोगिताकाभावाद्धेतोर्येनसंबंधेनयस्यव्याप्यतागृहीतातत्संबंधावच्छिन्नप्रतियोगि
ताकएवतदभावःसिध्यतीतिसमाधास्यन्अन्वयिनिव्याप्यताघटकसंबंधेनव्याप्यवताज्ञानात्व्यापकताघटकसं
बंधेनैवव्यापकंसिध्यतीतिनियमंदृष्टांतविधयादर्शयति॥पक्षेचेति॥तादृशेनतादृशेनैवपक्षविशिष्टज्ञानेपक्षध
र्मिकविशिष्टज्ञानेवैशिष्यानुमितिःवैशिष्यविषयकानुमितिः॥व्याप्यताघटकसंबंधेनैवव्याप्यत्वज्ञानहेतुरिति
नियमस्यव्यापकताघटकेनैवसंबंधेनव्यापकस्यानुमितिनियमस्यचक्रमेणप्रयोजनमाह॥तेनेति॥अनवतीर्ण
बाध्यस्याभ्युपेत्यस्थितिशेषः॥धूमावयवेनवह्निविशिष्टत्वेनेत्यर्थः॥तत्समवायेनवह्निव्याप्यधूमवत्वेपिव्याप्यताघटकेन
संयोगेनतद्वत्ताभावादितिभावः॥नवत्समवायेनेति॥पर्वतवृत्तिहेतुप्रतिसमवायेनवह्नेरव्यापकत्वादितिभावः॥प्रकृतोपयु
क्तनियमद्वयमाह॥तथैवेति॥संबंधेनासंबंधेनैव॥एतन्नियमद्वयस्यप्रयोजनांतरानुरोधेनाप्यावश्यकत्वमितिदर्शयति॥
कथमन्यथेति॥एतादृशनियमानभ्युपगमइत्यर्थः॥कथमुपपद्यतइत्यन्वयः॥महानसेसंयोगेनधूमोनिवर्त्ततेचधूमइ
त्यनुषज्यतेप्रकृतमाह॥तथाचेति॥व्याप्यत्वग्रहात्स्वरूपसंबंधावच्छिन्नपृथिवीत्वाभावनिष्ठव्यापकतानिरूपितव्याप्ता
ग्रहात्॥व्यापकनिरूप्यास्वरूपसंबंधावच्छिन्नप्रतियोगितायैवपृथिवीत्वाभावाभावेन॥तेषांजलादीनांनत्वेतावच्छिन्ना

ताप्यत्यन्ताभावसिद्धिःकथंनिराकृतेत्यतआह॥सयेवचेति॥सचान्योन्याभावएवेतियोजना॥तादात्म्यसंबंधावच्छिन्नाभावश्चान्योन्याभावएवनात्यंताभावइत्यर्थः॥अतोनैतदत्यंताभावसिद्धिरितिभावः॥तादात्म्यसंबंधेनव्याप्तेःप्राचांसम्मतिमाह॥इत्थमेवचेति॥तादात्म्यसंबंधेनव्याप्तिस्वीकारेणेवइतिग्रंथःसंगच्छतइत्यन्वयः॥ननुतादात्म्यसंबंधेनव्याप्यनभ्युपगमेकाक्षतिःपृथिव्यांजलादिभेदसिद्धेर्जलादिभेदाभावस्यापकीभूताभावप्रतियोगित्वेनपृथिवीत्वज्ञानादेवसंभवात्पृथिवैकदेशेजलादिभेदप्रसिद्धात्तादृशव्याप्तिग्रहसंभवस्यव्यतिरेकिणीवक्ष्यमाणत्वात्तादात्म्यसंबंधेनधर्मिणोऽनुमितेरप्यनुभवसिद्धत्वेधर्मितादात्म्यनिरूप्यापकताज्ञानस्यैवतद्धेतुतायाःस्वीकरणीयत्वात्असतिप्रतिबंधकेचतादात्म्यादिविधेयकानुमितौतादात्म्यसंबंधेनतस्यविधेयत्वोपगमेऽप्यतिविरहादित्यतआह॥अतएवेति॥तादात्म्येनव्याप्तिस्वीकारादेव॥गोत्वलाग्रहदशायांगोःसिध्यतीत्यन्वयः॥अन्यथातत्रगोत्वत्वरूपसाध्यतावच्छेदकानुपस्थित्यागोत्वसाध्यकानुमित्यैवपथिकव्याप्तेर्दुर्ग्रहतयागोत्वसाध्यकानुमितेःतादात्म्यस्यापिगोत्वरूपतयातन्निरूप्यापकताज्ञायाअपिगोत्वत्वोपस्थितिमंतरेणदुर्ग्रहतयातादात्म्यधर्मिकव्यापकज्ञानात्तादात्म्यसंसर्गकगवानुमितेश्चासंभवेनायंगोरित्याकारकानुमितेरनुभवसिद्धायाअपलापप्रसंगादितिभावः॥यद्यपिगोत्वांशेगोत्वंधर्मितावच्छेदकीकृत्यव्यापकताव्छेदकत्वावगाहिग्रहएवगोत्वेनगोसाध्यकानुमितावपिहेतुर्वाच्यःनिर्धर्मितावच्छेदकव्यापकताव्छेदकत्वग्रहस्यव्यभिचारज्ञानाप्रतिबध्यतयाअनुमित्यजनकत्वादितितादात्म्येननगोत्वावच्छिन्नसाध्यकानुमितिरपिगोत्वत्वानुपस्थितिदशायांनसंभवतितथापिवक्ष्यमाणप्रतियोगितानिर्धर्मिकउभयाभावघटितल

क्षणाभिप्रायेणेदमभिहितंतन्मतेस्वरूपतःसाध्यतावच्छेदकप्रकारकायामनुमितौस्वरूपतःसाध्यतावच्छेदकप्रकारकस्यसाध्यधर्मनिष्ठाभावप्रतियोगितावच्छेदेनसाध्यतावच्छेदकरूपावच्छिन्नसाध्यतावच्छेदकसंबंधावच्छिन्नत्वोभयाभावावगाहिज्ञानस्यहेतुतयातत्रगोत्वत्वज्ञानानपेक्षणेनानुपपत्त्यभावात्ईदृशयुक्त्यातादात्म्येनव्यापकतासिद्धिरवश्यगोत्वत्वायग्रहदशायांयत्रगोस्तत्रस्वाश्रयादिरितिव्याप्तिग्रहाधीनगवादिहेतुकसाध्यादिसिध्यनुरोधात्तत्संबंधेनव्याप्यतासिद्धिरपिद्रष्टव्याकेचित्तुतादात्म्यसंबंधेनव्यापकत्वानुपगमेपिगवान्यारत्तित्वरूपव्याप्तिज्ञानाद्गोत्वादिविधेयकानुमितिर्निष्प्रत्यूहैवतथासत्ययंगोरित्याकारकतापिअनुमितेर्निर्वहतिःस्वरूपतोगोत्वावगाहिनोगवान्यारत्तित्वज्ञानात्स्वरूपतएवगोत्वविषयितायास्तस्याःसंभवात्नचानवच्छिन्नविधेयतायाःकुतश्चित्वात्तादात्म्यसंबंधेनगोरेवविधेयतमुचितंअयंगोरित्यादिवाक्यजन्यबोधेतादात्म्यसंबंधावच्छिन्नगवादिविधेयतायाःकुत्रचिदितिवाच्यंअयंगोरित्याकारकेदंतावच्छिन्नविशेष्यकगोत्वादिप्रकारकप्रत्यक्षेयागोत्वादिप्रकारतास्थाएवविधेयतालोपेगमेपिअनुमितौतत्कल्पनेतिरिक्तविधेयताकल्पनाऽभावात्अस्तुवागवान्यारत्तित्वरूपव्याप्तिज्ञानादेवतादात्म्येनगवानुमितिःकिंतादात्म्येनव्यापकतेयत्यादौकानिराचिकीर्षयोक्तंगोत्वत्वायग्रहदशायामितिगवेतरावृत्तित्वस्यहेतुभूतस्यान्यारावृत्तग्रहदशायामित्यर्थेकरणात्गुरुःतन्नगवेतरावृत्तित्वमात्रस्यगोत्वलक्षणाद्यर्थतावच्छेदकतायादुर्वारत्वात्गोत्वपदंतद्वृत्तिधर्मपरमितिनव्यम्यक्तिविशिष्टगोवृत्तित्वरूपस्यगोत्वस्यस्वरूपतोभानाऽसंभवेनतत्ज्ञानदशायांतद्वृत्तिधर्मभानस्यावश्यकत्वात्अपरेतुगोत्वत्वायग्रहदशायामपिगौःसेतीत्यन्वयःयदागोत्वमनुमितौनभासतेतदापिन्नगोर्भासतइत्यर्थःस्वरूपतोगोत्वादिप्र

कारिकागवाद्यनुमितिर्भवतीतियावत्तादात्म्येनव्यापकत्वानुपगमेगोत्वस्यैवसास्नादिलिंगकानुमितौभानस्योपगतव्यतिरिक्तविधेयता
याश्चावच्छिन्नत्वनियमेनस्वरूपतोगोत्वप्रकारकानुमितेरनुभवसिद्धायाअनुपपत्तिरित्युपरंभसंगतिरितिप्राहुःयत्तुअनवच्छेद
कांशेतादात्म्यसंबंधेनस्वरूपतःसाध्यतावच्छेदकप्रकारकज्ञानादनवच्छेदकत्वांशेआधेयतासंबंधेनस्वरूपतस्तत्प्रकारकज्ञाना
दास्वरूपतस्तत्प्रकारिकानुमितिरित्युपगमेनगोत्वत्वाग्रहदशायामपितादात्म्येनव्यापकताज्ञानादनुमितिर्निर्वहतीति
नोक्तानुपपत्तिरितितदमत्तूक्तंगोरित्यादिज्ञानानुभवसापेक्षस्वरूपतोगोत्वादिविशेषितप्रकारिताप्रकारेणज्ञानभाना
तत्समवायातिरिक्तेननिरूपितत्वसंबंधेनगोत्वादेःस्वरूपतःप्रकारताज्ञानहेतुतामतेस्वरूपतोज्ञानत्वादेर्विधेयता
वच्छेदकतानुपपत्त्याकेवलान्वयिग्रंथेतज्ज्ञानस्यानुमितिहेतुतासंउनदीधितिरुक्तांविरुद्धेतउक्तक्रमेणेतन्निर्वा
हानचेत्थापिप्रतियोगिताधर्मिकोभयाभावघटितलक्षणाभिप्रायकतयापिनेतद्ग्रंथसंगतिरितिवाच्यंप्र
कारितांशेऽनवच्छेद्यत्वांशेपिनिरूपितत्वसंबंधेनज्ञातेःस्वरूपतःप्रकारताभिप्रायेणेतद्ग्रंथसंगमनेपितस्मा
दाभाणिकत्वाभिप्रायेणाग्निमव्यापकताज्ञानहेतुतारंउनसंगते। अपरंतुगोलज्ञाप्यग्रहदशायामपिस्वरूपतो
भासमानगोत्वावच्छिन्नेहेतुमनिष्ठभेदप्रतियोगितानिरूपिततादात्म्यसंबंधावच्छिन्नावच्छेदकत्वाभावरूपान्न्यूनभाव
घटिततादात्म्यसंबंधावच्छिन्नव्यापकताज्ञानात्तादात्म्येनस्वरूपतोगोत्वप्रकारिकानुमितिःसंभवत्येवैकरूपेणावच्छेद
केपिअवच्छेकत्वानवच्छेदकत्वयोरवच्छेदकत्वाभावस्यैकरूपेणाभावाद्घटितलक्षणस्यग्रंथकृतायदूपावच्छिन्न
मित्यादिनाचरिष्करणीयत्वात्एतदभिप्रायेणैवतत्संगतेःकेवलान्वयिग्रंथेचप्रतियोगितानवच्छेदक, २७
रूपेणप्रतियोगितायाभावस्यैवावच्छेदकेप्यनवच्छेदकत्वानवच्छेदकरूपेणावच्छेदकत्वाभावस्याभाणिकतयाव्यापकता

ज्ञानेसाध्यतावच्छेदकस्यस्वरूपतोभानंनसंभवतीत्यभिप्रायेणव्यापकताज्ञानहेतुतामतेस्वरूपतोज्ञानत्वादिप्रकारकानु
मितेरनुपपत्तेर्वक्ष्यमाणतयापूर्वापरग्रंथविरोधइतिप्राहुःतादात्म्येनगोत्वातिरेकांशेतितादात्म्यसंबंधावच्छि
न्नप्रतियोगिताकतादात्म्यसंबंधघटितव्यापकतावच्छेदकंगोत्वावच्छिन्नस्यभेदरूपाभावादित्यर्थः।समवा
यसंबंधावच्छिन्नगोत्वाभावस्यसाधकत्वेपितत्प्रतियोगितावच्छेदकगोत्वत्वाग्रहदशायांतदभावस्यज्ञाना
संभवेनततःसास्नाभावसिध्यसंभवादिभावः॥वच्छिन्नत्वप्रकारकप्रतियोगिताज्ञानेअवच्छेदतायांनिरूपितत्वसंबंधेनस्व रू
रूपतोगोत्वप्रकारकत्वादिधितिकारस्यामतमेवंतथासत्यपिअग्निमंद्रविरोधादित्यवनाधिकरणत्वस्यानेसंबंधित्वनिवे
शेचगगनादेरपिनित्यस्याधिकरणप्रसिद्धावपिसंयोगेनतत्संबंधिरहितत्वस्याभावेतत्रसाध्यतत्संबंधित्वस्यप्र
सिद्ध्यापत्त्योक्त्याप्तिसत्वादितिभावःरत्यनिपामकसंयोगव्यावृत्तस्वरूपेणसंयोगस्याभावप्रतियोगितावच्छेदकसंबन्धत्वे
नसाध्यतावच्छेदकसंबंधस्यगगनीयसंयोगस्याभावप्रतियोगितानवच्छेदकतयाप्रतियोगितायांसाध्यतावच्छेदकसंबंधा
वच्छिन्नत्वनिवेशकल्पेतथाविधप्रतियोगित्वाप्रसिद्ध्यासंयोगेनगगनस्यव्यापकतानिर्वहतीत्यतउक्तंरत्यनिपामकसं
योगमात्रस्येति।तादृशसंयोगसाधारणसंयोगत्वावच्छिन्नस्येत्यर्थःमहत्याघटकल्पेरत्यनिपामकसंयोगसाधार
णरूपेणतादृशसंबंधत्वविरहेपिनक्षतिस्तन्मतेप्रतियोगितायांसाध्यतावच्छेदकसंबंधानवच्छिन्नत्वानिवेशादित्याशयेना
हसाध्यतावच्छेदकसंबंधेनेतिपृथिवीत्वादिव्यापकत्वमपीत्यत्रसंयोगेनगगनादेरित्यनुषज्यते।ननुप्रतियोगितायांसा
ध्यतावच्छेदकसंबंधावच्छिन्नत्वानिवेशेपृथिव्यादिनिष्ठसमवायादिसंबंधावच्छिन्नाभावप्रतियोगितयागगनादेर्नपृथि
वीत्वादिव्यापकत्वासंभवइत्यतआहतदभावबतोपीतिसमवायादितोगगनाद्यभावबतोपीत्यर्थःतत्संबंधित्वात्तुगगना

दिसंबंधित्वात्तथाचतादृग्गगनाद्यभावोनसाध्यतानच्छेदकसंबंधेनप्रतियोग्यसंबंधिहेतुमन्निष्ठात्यभावांतरमा
दायतल्लक्षणसत्वनिष्प्रत्यूहमेवेतिभावः ननुसंयोगेनगगनव्यापकत्वबाधानवतारदशायांश्रोत्रस्यवृत्तिनियामकसं
योगेनैवकथंनगगनानुमितिरित्यतआहलिंगेति।तथैववृत्तिनियामकसंयोगेनैवतेनासंबंधित्वादितथा
चतत्संबंधावगाहनेनुमितेर्भ्रमत्वायत्रेत्यादिव्यापकत्वाच्चेतिवृत्तिनिया
मकेनसंबंधेनैवगगनाद्यभावस्यप्रतियोगिसमानाधिकरणतयावृत्तिनियामकसंयोगेनप्रतियोगिव्यधिकरणा
भावप्रतियोगितायागगनेसत्त्वेनतत्संबंधस्यव्यापकत्वाघटकत्वादित्यर्थः तथाचव्यापकत्वघटकसंबंधस्यानुमित्यव
च्छेदकत्वात्तेनसंबंधेनानुमितिप्रसंगइतिभावः ननुवृत्तिनियामकसंयोगेतद्गगनादिसंबंधिनोःप्रसिद्ध्यानतेन
संबंधेनगगनाद्यभावस्यप्रतियोगिवैयधिकरण्यमित्यतआहव्यक्तीभविष्यतीतिनक्ष्यमाणोभयाभावघटितप्रतियो
गिवैयधिकरण्यंतत्रापिसुलभमितिभावः कालिकविशेषणतयाघटादिसाधकेमहाकालत्वादिहेतोरप्रसिद्धि
निबंधनाव्याप्तिंशंकतेनत्वित्यादिना खंडकालत्वेतत्कालत्वादिहेतुकस्यलेऽतीतानागतव्यक्तीतांतत्तद्व्यक्ति
क्षिलावच्छिन्नतादृशसंबंधावच्छिन्नाभावएवहेतुमतिप्रतियोगिव्यधिकरणःप्रसिद्धइतिनाव्याप्तिरतोषद्रव्यातिरिक्त
द्रव्यात्मकेतिजन्यमात्रस्यकालोयाधिलाप्रतेर्द्रव्यात्मकस्यापिखंडकालस्यसंभवान्नमहाकालपर्य्याप्तत्वाभइत्यतोऽ
तिरिक्तांतयेत्यपिगगनदिगात्ममनसांतित्यत्तयाखंडकालत्वासंभवेनचतुर्द्रव्यातिरिक्तेत्युक्तावपिमहाकालत्वा
भस्तथापिपरत्वंकेतित्वेचतुर्द्रव्यातिरिक्तत्वस्यपरिमाणादावपिसत्वात्परिमाणादिचतुष्टयातिरिक्तत्वस्यविशिष्याभिधा २८
नएवतत्रभः तात्त्रिकेमहाकालस्यैवाष्टद्रव्यातिरिक्तद्रव्यपदेनाभिधानेतत्पाभिधानेविशिष्याभिधानेविना

LIBRARY

न्यपरत्वंकेतित्यर्थेवाभिहितेखंडकालसाधारणमहाकालवृत्तेर्हेतुत्वेखंडकालरूपेहेत्वधिकरणएवलक्ष्यघटकोऽसा
वप्रसिद्धिरितिकालमात्रवृत्तीत्यत्रमात्रपदंसमवायादिनाकस्यचित्साध्यत्वेसमवायादिनाघटाद्यभावएवमहाकाले
तेनसंबंधेनप्रतियोगिव्यधिकरणःप्रसिद्ध्यतीत्यतोविशेषणताविशेषणेतिकालिकविशेषणतेत्यर्थः व्यापकवृत्तिसा
ध्यकेप्रतियोगिनैवयधिकरणमनुपादानेनकेवलान्वयित्वव्याप्यत्वादिव्यापकतासंभवइत्याहोःव्यापकवृत्तीतिकालिक
संबंधेनाव्यापकवृत्तित्वंचव्यतिरेकिमात्रस्यैवकेवलान्वयिनोव्यतित्यस्यविश्वनिष्ठयकज्ञन्यंतानुविषयत्वादेर्बोधंप्रतत्स
र्ववस्त्वाद्यभिप्रायेणाभिहितंमहाकालान्यवृत्तिहेतुकेऽन्यसंबंधेनसाध्यतापांवहेतुमतिसंबंधेनसाध्यतावच्छेदकसंबं
धेनवृत्तिमन्मात्रस्यैवतेनसंबंधेनवृत्तित्वभ्रमदशायांअनुमितिजनकज्ञानानुपपत्तिरपिद्रष्टव्याएवंकालिकसंबंधे
नव्याप्यवृत्तिसाध्यकेपिसाध्यस्यव्याप्यवृत्तित्वभ्रमदशायांप्रतियोगिवैयधिकरण्याघटितायाःप्रतियोगिवैयधिकर
ण्यघटितायाश्चदुर्ग्रहत्वान्महाकालत्वादिहेतुकेनुमित्यावच्छेदकसंबंधेनस्वावच्छेदकविशिष्टाधिकरणहेत्वधिक
रणवृत्त्यभावापसाध्यतावच्छेदकसंबंधावच्छिन्नप्रतियोगितानिवेशकल्पेतादृशप्रतियोगित्वाप्रसिद्ध्यभिधानेना
व्याप्तिस्फुटिकरणायस्वावच्छेदकेतिसंप्रतियोगिताकालेमहाकालेतत्संबंधावच्छिन्नत्वस्यकालिकसंबंधावच्छिन्न
त्वस्यचसंभवादितियोजनाकालिकसंबंधेनवृत्तिमन्मात्रस्यैवमहाकालेवृत्तेश्चतेनसंबंधेनसंबंधिनोःप्रसिद्ध्याक

स्यापिकालिकसंबंधावच्छिन्नाभावस्यप्रतियोगितावच्छेदकसंबंधेनप्रतियोग्यसंबंधिहेतुमद्वृत्तित्वासंभवेनसमवायादिसंबं
धावच्छिन्नघटाद्यभावस्यैवतथात्वात्तत्प्रतियोगितायाः समवायादिसंबंधेनैवावच्छिन्नत्वादितिभावः साध्यतावच्छेदकसं
बंधेनप्रतियोग्यसंबंधिहेतुमद्वृ भावीयसंबंधविशेषावच्छिन्नत्वानिवेशितप्रतियोगितानिवेशकत्वेनादृशसंबंधेनप्रति
योग्यसंबंधिहेतुमत्तएवाप्रसिद्धाव्याप्तिरित्याशयेनाहतेनेतितेनसंबंधेनकालिकसंबंधेनगगनाद्यभावप्रतियोगि
नस्तेनसंबंधेनसंबंधिरूपप्रतियोग्यप्रसिद्धातेनसंबंधेनप्रतियोग्यसंबंधित्वाप्रसिद्धिंस्फुटीकर्तुप्रतियोग्यसंबंधि
